# Shri Govindaraja Suprabhatam

# શ્રીગોવિન્દરાજસુપ્રભાતમ્

## Document Information

Text title : Shri Govindaraja Suprabhatam 06 01

File name : govindarAjasuprabhAtam.itx

Category : vishhnu, suprabhAta, krishna

Location : doc_vishhnu

Proofread by : Saritha Sangameswaran

Description/comments : prakIrNastotrANi Stotrarnavah Ed. T.Chandrasekharan 1961 From stotrArNavaH 06-01

Latest update : March 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2022

*sanskritdocuments.org*

# શ્રીગોવિન્દરાજસુપ્રભાતમ્

શ્રીભૂમિનાયક દયાપર દિવ્યમૂર્તે
    દેવાદિદેવ જગદેકશરણ્ય વિષ્ણો ।
ગોપાઙ્ગનાકુચતટેષુ નિમગ્નદૃષ્ટે
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧॥

દેવાદિદેવ ફણિરાજવિહઙ્ગરાજ-
    રાજત્કિરીટમણિરાજવિરાજિતાઙ્ઘ્રે ।
રાજાધિરાજ વસુદેવકુલાધિરાજ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૨॥

કાસારયોગિપરમાદ્ભુતભક્તિબદ્ધ-
    વાઙ્મૂલભૂષિતમહોત્પલરમ્યપાદ ।
ગોપાધિનાથ વસુદેવકુમાર કૃષ્ણ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૩॥

શ્રીભૂતયોગિપરિકલ્પિતદિવ્યમાન-
    જ્ઞાનપ્રદીપપરિદૃશ્યરતૈકતાન ।
ગોગોપજાલપરિરક્ષણબદ્ધદીક્ષ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૪॥

માન્યાનુભાવમહદાહ્વયયોગિદૃષ્ટે
    શ્રીશઙ્ખચક્રકમલાસહિતામલાઙ્ગ ।
ગોપીજનપ્રિયચરિત્ર વિચિત્રવેષ-
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૫॥

શ્રીમત્ત્વદીયપદપઙ્કજભક્તિનિષ્ઠ-
    શ્રીભક્તિસારમુનિનિશ્ચિતમુખ્યતત્ત્વ ।
ગોપીજનાર્તિહર ગોપજનાન્તરઙ્ગ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૬॥

શ્રીમત્પરાકુશમુનીન્દ્રસહસ્રશાખ-
    સંસ્તૂયમાનચરણામ્બુજ સર્વશેષિન્ ।
ગોપાલવંશતિલકાચ્યુતપાદપદ્મ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૭॥

શેષાચલે મહતિ પાદપપક્ષિજન્મ
    તદ્ભક્તિતઃ સ્પૃહયતા કુલશેખરેણ ।
રાજ્ઞા પુનઃપુનરુપાસિતપાદપદ્મ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૮॥

શ્રીવિષ્ણુચિત્તકૃતમઙ્ગલદિવ્યસૂક્તે
    તન્માનસામ્બુરુહકલ્પિતનિત્યવાસ ।
ગોપાલબાલયુવતીવિટસાર્વભૌમ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૯॥

શ્રીવિષ્ણુચિત્તકુલનન્દનકલ્પવલ્લી
    ગોદાલકાન્તવિનિવેશિતમાલ્યલોલ ।
ગોપાઙ્ગનાકુચકુલાચલમધ્યસુપ્ત
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૦॥

ભક્તાઙ્ઘ્રિરેણુમુનિના પરમત્વદીય-
    શેષત્વમાશ્રિતવતા વિમલેન નિત્યમ્ ।
પ્રાબોધકીસ્તુતિકૃતા હ્યવબોધિતશ્રીઃ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૧॥

શ્રીપાણનામકમહામુનિદિવ્યનામ-
    દિવ્યાનુભાવદયમાનદૃગઞ્ચલાખ્ય ।
પૂર્ણાનુકમ્પ પુરુષોત્તમ પુષ્કરાક્ષ
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૨॥

ભક્તોત્તમાય પરકાલમુનીન્દ્રનામ્ને
    વિશ્રાણિતાતુલમહાતનુમૂલમન્ત્ર ।
સર્વાત્મરક્ષણવિચક્ષણ ચક્રપાણે
    ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૩॥

સત્ત્વોત્તરૈઃ સતતસેવ્યપદામ્બુજેન

સંસારતારકદયાર્દ્રદૃગઞ્ચલેન ।
સૌમ્યોપયન્તુમુનિમાનસરાજહંસ
ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૪॥

ભક્તપ્રપન્નકુલનાયકભાષ્યકાર-
સઙ્કુલ્પકલ્પતરુદિવ્યફલામલાત્મન્ ।
શ્રીશેષશૈલનિકટસ્થિતશેષશાયિન્
ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૫॥

શ્રીમચ્છઠારિકરુણાશ્રિતદેવગાન-
સારજ્ઞનાથનુનિસન્નુતપુણ્યમૂર્ત ।
ગોબ્રાહ્મણપ્રિયગુરો શ્રિતપારિજાત
ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૬॥

દેવ પ્રસિદ્ધ કરુણાકર ભક્તવર્ગ-
સેનાપતિપ્રણયિતાખિલલોકભાનો ।
શ્રીવાસદિવ્યનગરાધિપ રાજરાજ
ગોવિન્દરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૧૭॥

ઇતિ શ્રીગોવિન્દરાજસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

*Shri Govindaraja Suprabhatam*

pdf was typeset on March 27, 2022

Please send corrections to *sanskrit@cheerful.com*